.. shrIharinAmamAlA stotram ..

॥ श्रीहरिनामममालास्तोत्रम् ॥

Document Information

Text title : harinAmamAlA
File name : harinAmamAlA.itx
Category : mAlAmantra
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion/vedanta
Transliterated by : DPD
Proofread by : DPD
Latest update : November 19, 2011
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

॥ श्रीहरिनाममालास्तोत्रम् ॥

गोविन्दं गोकुलानन्दं गोपालं गोपिवल्लभम् ।
गोवर्धनोद्धरं धीरं तं वन्दे गोमतीप्रियम् ॥ १॥

नारायणं निराकारं नरवीरं नरोत्तमम् ।
नृसिंहं नागनाथं च तं वन्दे नरकान्तकम् ॥ २॥

पीताम्बरं पद्मनाभं पद्माक्षं पुरुषोत्तमम्
पवित्रं परमानन्दं तं वन्दे परमेश्वरम् ॥ ३॥

राघवं रामचन्द्रं च रावणारिं रमापतिम्
राजीवलोचनं रामं तं वन्दे रघुनन्दनम् ॥ ४॥

वामनं विश्वरूपं च वासुदेवं च विठ्ठलम् ।
विश्वेश्वरं विभुं व्यासं तं वन्दे वेदवल्लभम् ॥ ५॥

दामोदरं दिव्यसिंहं दयाळुं दीननायकम् ।
दैत्यारिं देवदेवेशं तं वन्दे देवकीसुतम् ॥ ६॥

मुरारिं माधवं मत्स्यं मुकुन्दं मुष्टिमर्दनम् ।
मुञ्जकेशं महाबाहुं तं वन्दे मधुसूदनम् ॥ ७॥

केशवं कमलाकान्तं कामेशं कौस्तुभप्रियम् ।
कौमोदकीधरं कृष्णं तं वन्दे कौरवान्तकम् ॥ ८॥

भूधरं भुवनानन्दं भूतेशं भूतनायकम् ।
भावनैकं भुजङ्गेशं तं वन्दे भवनाशनम् ॥ ९॥

जनार्दनं जगन्नाथं जगज्जाड्यविनाशकम् ।
जमदग्निं परं ज्योतिस्तं वन्दे जलशायिनम् ॥ १०॥

चतुर्भुजं चिदानन्दं मल्लचाणूरमर्दनम् ।
चराचरगुरुं देवं तं वन्दे चक्रपाणिनम् ॥ ११॥

श्रियःकरं श्रियोनाथं श्रीधरं श्रीवरप्रदम्
श्रीवत्सलधरं सौम्यं तं वन्दे श्रीसुरेश्वरम् ॥ १२॥

योगीश्वरं यज्ञपतिं यशोदानन्ददायकम्
यमुनाजलकल्लोलं तं वन्दे यदुनायकम् ॥ १३॥

सालिग्रामशिलशुद्धं शंखचक्रोपशोभितम् ।
सुरासुरैः सदा सेव्यं तं वन्दे साधुवल्लभम् ॥ १४॥

त्रिविक्रमं तपोमूर्तिं त्रिविधघौघनाशनम् ।

त्रिस्थलं तीर्थराजेन्द्रं तं वन्दे तुलसीप्रियम् ॥ १५॥

अनन्तमादिपुरुषं अच्युतं च वरप्रदम् ।
आनन्दं च सदानन्दं तं वन्दे चाघनाशनम् ॥ १६॥

लीलया धृतभूभारं लोकसत्त्वैकवन्दितम् ।
लोकेश्वरं च श्रीकान्तं तं वन्दे लक्ष्मणप्रियम् ॥ १७॥

हरिं च हरिणाक्षं च हरिनाथं हरप्रियम् ।
हलायुधसहायं च तं वन्दे हनुमत्पतिम् ॥ १८॥

हरिनामकृतामाला पवित्रा पापनाशिनी ।
बलिराजेन्द्रेण चोक्त्ता कण्ठे धार्या प्रयत्नतः ॥

॥ इति महाबलिप्रोक्तं हरिनाममालास्तोत्रम् ॥

Encoded and proofread by DPD

.. shrIharinAmamAlA stotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*